दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लनवमी
श्रावण 06 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-272 | 1 | जुलाई 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



**2** भारत-उत्तर- मैसेडोनिया-देशौ लोकतान्त्रिक-मूल्यानां, परस्पर-आदरस्य आधारेण च स्वकीय-प्रगाढ-मैत्रीसम्बन्धं पुनः सुदृढम् अकुरुताम्-राष्ट्रपतिः मुर्मू

**3** हिमाचलस्य 'टैक्सी-सञ्चालकानां' महत्तमा याचना पूर्णा, १५ वर्षियावधिं यावत् चलिष्यन्ति 'ऑल इण्डिया टूरिस्ट परमिट' वाहनानि

**4** पहाड़ी कविता
नहीं भूलदे सै
पुराणे वाले दिन


## उत्तराखण्ड-राज्ये चारधाम-यात्रा पुनः समारब्धा



उत्तराखण्ड-राज्ये अश्रान्तं जलवृष्टेः तथा यात्रा-मार्गेषु सम्भाव्य-भूस्खलन-सङ्कटस्य कारणात् अवधानतया स्थगिता सुप्रसिद्धा 'चार-धाम यात्रा' पुनः समारब्धा। इयं पावनी यात्रा मण्डल-प्रशासन-आरक्षि-बलेन अथ अन्याधिकारि-वर्णैः सह समन्वयं विधाय सुचारु-रूपेण सञ्चाल्यते। अधुना तावत् तीर्थ-मार्गेषु अहर्निशं सूक्ष्म-प्रत्यवेक्षणं प्रचलति, आपद्-क्षेत्रेषु च सर्वोच्च सतर्कता वर्त्यते। आयुक्तः साग्रहम् अभ्यर्थितवान् यत् यात्रिणः स्व-प्रस्थान-पूर्व नवीनतम ऋतु-उद्गारान् अवलोकयेयुः, प्रशासन-पक्षतः प्रकाशितासु आधिकारिक सूचनास्वेव च विश्वसेयुः।

## सिक्किम-राज्यस्य नामची-मण्डलस्य 'समरडुङ्ग' क्षेत्रे जनान् सुरक्षिततया निष्कासयितुं तीव्र-उद्धार कार्यम् अहोरात्रं प्रचलति

हिमसंस्कृतवार्ता। सिक्किम-राज्यस्य नामची-मण्डलस्य 'समरडुङ्ग' क्षेत्रे 'एन.एच.पी.सी. तीस्ता-चरण-षट् जलविद्युत्-परियोजनायाः' निर्माणाधीने सुरङ्गे अवरुद्धान् जनान् सुरक्षिततया निष्कासयितुं तीव्र-उद्धार कार्यम् अहोरात्रं प्रचलति। उद्धार-दलेन सम्प्रति यावत् एकादश मृतात्मनां देहाः समुद्धृताः सन्ति। आशङ्क्यते यत् ह्यः भूस्खलन-कारणात् ध्वस्ते सुरङ्गे न्यूनतमं पञ्चविंशतिः श्रमिकाः अद्यापि अवरुद्धाः सन्ति। प्रधानमन्त्री नरेन्द्रमोदी सिक्किम-राज्यस्य मुख्यमन्त्रिणा प्रेमसिंह-तमाङ्ग-गोले इत्यनेन सह दूरभाषेण वार्ता विधाय सर्वाः सहायताः प्रदातुं प्रतिबद्धताम् प्रकटितवान्। सम्प्रति नामची-मण्डल-प्रशासनम् एन.एच.पी.सी.-अधिकारिभिः, एस.डी.आर.एफ., एन.डी.आर.एफ., सिक्किम-आरक्षि-बलेन, अग्निशमन आपत्कालीन-सेवाभिः तथा स्वास्थ्य-विभागेन सह समन्वयं कृत्वा निरन्तरं आपद्-उद्धार-कार्य सञ्चालयति।

## भविष्ये देशे सर्वासां परीक्षाणां प्रश्नपत्र-प्रकटन-रोधनाय सर्वैः हितधारकैः सह समन्वित-प्रयासानां समाह्वानं कृतवान् प्रधानमन्त्री



हिमसंस्कृतवार्ता। संसद् भवनस्य जी.एम्.सी. बालयोगी-प्रेक्षागृहे मङ्गल-मिलन इत्याख्यः एनडीए-संसदीयदलस्य उपवेशनम् आयोजितम्। अस्मिन् उपवेशने गठबन्धन सहयोगिभिः भारतस्य सुदीर्घ-कालं यावत् सेवारत निर्वाचित प्रधानमन्त्रित्वस्य पदालङ्करणाय प्रधानमन्त्रिणः नरेन्द्र मोदिनः अभिनन्दन प्रस्तावः पारितः। संसदीय-कार्य-मन्त्री किरेन रिजिजूः प्रत्यपादयत् यत्, उपवेशनावधौ प्रधानमन्त्रिणा मोदिना भविष्ये देशे सर्वासां परीक्षाणां प्रश्नपत्र-प्रकटन-रोधनाय सर्वैः हितधारकैः सह समन्वित-प्रयासानां समाह्वानं व्यधायि। सः प्रावोचत् यत्, प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणेषु लिप्तानां जनानामुपरि दृढ-कार्याचरणं सहैव देशस्य यूनां हितरक्षणाय सर्वकारस्य प्रतिबद्धता प्रधानमन्त्रिणा पुनरावर्तिता। प्रधानमन्त्रिणा न्यगद्यत यत् साम्प्रतिके नीट-प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणे संलिप्ताः सर्वे अभियुक्ताः गृहीताः।श्रीरिजिजूः प्रोक्तवान् यत्, प्रधानमन्त्रिणा मोदिना विभिन्न देशैः सह भारतस्य मुक्त-व्यापार-सन्धेः विषयेऽपि भाषितम्। उपवेशने श्रीमोदिना स्पष्टीकृतं यत्, प्रत्येकेषु मुक्त-व्यापार-सन्धिषु भारतीय कृषकाणां हिताय सर्वोच्च प्राथमिकता प्रदीयते।

## नीट-प्रश्नपत्र-गोप्यताभङ्गप्रकरणे विपक्षी सदस्यानां निरन्तर-कोलाहलेन आगामिदिनं यावत् स्थगितम् प्रावृट्सत्रम्



हिमसंस्कृतवार्ता। संसद्भवनस्य प्रावृट्-सत्रस्य कार्याचरणमद्य नीट-प्रश्नपत्र-गोप्यताभङ्गप्रकरणे विपक्षी सदस्यानां निरन्तर-कोलाहलेन आगामिदिनं यावत् स्थगितम्। विपक्षस्य अवरोधत्वात् उभयोः सदनयोः कार्याचरणं तावत् वारत्रयम् अपवारितम्। गत प्रातः एकादश-वादने यदा लोकसभायाः क्रियाकलापाः आरब्धाः, तदा अध्यक्षेण ओम बिरलावर्येण प्रश्नकालस्य सञ्चालनाय बहुधा प्रयासाः विहिताः किन्तु विपक्षी-सदस्याः नीट-प्रश्नपत्र-गोप्यताभङ्गप्रकरणमादाय विरोधं प्रादर्शयन्। अध्यक्षः सदनस्य सञ्चालनाय समेभ्यः सहयोगम् अयाचत्, परञ्च अविरत प्रतिरोध-कारणात् लोकसभा मध्याह्न-द्वादश-वादनं यावत् स्थगितीकृता। मध्याह्न पुनः समवेतायां लोकसभायां संसदीय समितीनां निर्वाचन-प्रस्तावाः गृहीताः। पीठासीना सन्ध्या रॉयः अवदत् यत् शून्यकालः सदस्यानां कृते भवति, समग्र-देशः अस्य कार्याचरणस्य साक्षी वर्तते। तथापि पट्टिकाः गृहीत्वा सदस्याः सभामध्ये आगत्य विरोधोद्घोषान् अकुर्वन्, येन कार्याचरणं द्विवादनं यावत् बाधितम्। द्विवादने पीठासीनः दिलीप-सैकिया इत्यसावपि सदन सञ्चालनाय पुनः आग्रहमकरोत्, किन्तु कोलाहलत्वात् पीठेन लोकसभा अद्य प्रातः एकादश-वादनं यावत् स्थगिता।राज्यसभायाम् अपि एतादृशः एव दृश्यः दृष्टमगात्। अपराह्ने द्विवादने द्वितीयान्तर-स्थगनात् परं यदा उच्चसदनं समवेतम्, तदा उपसभापतिः हरिवंशः निर्धारित-कार्याणि सञ्चालयितुं प्रायतत। किन्तु विपक्षस्य अविरत-कोलाहलेन राज्यसभापि अद्य प्रातः एकादश-वादनं यावत् अपवारिता।

## युवकार्यविभागेन 'माई भारत' पटलिनि राष्ट्रध्वज-प्रश्नोत्तरी २०२६ आरब्धा

युवकार्यविभागेन 'माई भारत' पटले राष्ट्रध्वज-प्रश्नोत्तरी २०२६ इति आरब्धा। इयं प्रश्नोत्तरी अगस्तमासस्य १५ दिनाङ्कं यावत् उद्घाटिता स्थास्यति। अनेन आभारतस्य यूनां भारतस्य राष्ट्रध्वजं तस्य महत्वं च प्रति स्वबोधं वर्धयितुं अवसरः लप्स्यते। युवकार्य-क्रीडामन्त्रालयेन उक्तं यत् अस्य प्रयासस्य उद्देश्यं यूनां मध्ये भारतस्य राष्ट्रध्वजस्य इतिहासम्, विकासम्, महत्वं गरिमां च प्रति जागरुकतां वर्धयितुं वर्तते। अनेन सह एव एतत् देशभक्तिम्, संवैधानिकमूल्यानि तथा च 'माई भारत' मञ्चेन सह यूनां अधिकाधिकं सहभागितां अपि प्रोत्साहयिष्यति।

## सुभाषितम्

**सन्त एव सतां नित्यम्,**
**आपदुद्धरणक्षमाः।**
**गजानां पङ्कमग्नानां,**
**गजा एव धुरन्धराः॥**
**(हितोपदेश, मित्रलाभ- १९३)**

अर्थात्- सज्जन ही सज्जनों की आपत्ति को सर्वदा दूर करने के योग्ये होते हैं। जैसे कीचड़ में फंसे हुए हाथियों को निकालने के लिए हाथी ही समर्थ होते हैं।









## वाणिज्यिक-पोतानां लक्ष्यीकरणं सहैव निर्दुष्ट-नागरिकाणां प्राणहरणं सर्वथा निन्दनीयम्-विदेशमन्त्रालयः

अस्य मासस्य एकोनविंशे दिनाङ्के एम.वी. गोल्डन लियो इति वाणिज्यिक पोते दुरापन्नस्य घातक-आक्रमणस्य पृष्ठभूमौ भारतेन रूस-देशस्य कूटनीतिकाधिकारी व्लादिमीर लादानोव इत्यसौ वैदेशिक कार्य-मन्त्रालयम् आहूतः। अस्मिन् दुःखादाक्रमणे चत्वारः भारतीय नागरिकाः स्वप्राणान् अत्यजन्। अस्य भीषण-प्रहारस्य निन्दां कुर्वन् स्वस्य गभीरां चिन्तां च प्रकटयन् वैदेशिक-कार्य-मन्त्रालयः स्पष्टीकृतवान् यत्, एतादृशानि आक्रमणानि अन्ताराष्ट्रिय-सामुद्रिक-व्यापारस्य सुरक्षां, स्थिरतां च क्षतिं नयन्ति। मन्त्रालयेन श्रीलादानोव इत्यसौ स्वोच्चाधिकारिभ्यः भारतस्य तीव्र विरोधं ज्ञापयितुं निर्दिष्टः। तैरुक्तं यत् वाणिज्यिक-पोतानां लक्ष्यीकरणं सहैव निर्दुष्ट-नागरिकाणां प्राणहरणं सर्वथा निन्दनीयम् सहैव एतत् सर्वतोभावेन वर्जनीयमिति।

# भारत-उत्तर- मैसेडोनिया-देशौ लोकतान्त्रिक-मूल्यानां, परस्पर-आदरस्य आधारेण च स्वकीय-प्रगाढ-मैत्रीसम्बन्धं पुनः सुदृढम् अकुरुताम्-राष्ट्रपतिः मुर्मु



**हिमसंस्कृतवार्ता।** राष्ट्रपतिपदासीना द्रौपदी मुर्मु अवोचत् यत् भारत-उत्तर- मैसेडोनिया-देशौ लोकतान्त्रिक-मूल्यानां, परस्पर-आदरस्य आधारेण च स्वकीय-प्रगाढ-मैत्रीसम्बन्धं पुनः सुदृढम् अकुरुताम्। 'स्कॉप्ये' नगरे उत्तर- मैसेडोनिया-देशस्य राष्ट्रपतिना गोर्डाना सिल्यानोव्स्का-दावकोवा इत्यनया सह द्विपक्षीय वार्तानन्तरं वार्ताहरैः सह भाषमाणा राष्ट्रपतिः मुर्मु प्रत्यपादयत् यत् उभौ पक्षौ द्विपक्षीय सहयोगस्य समग्र-व्याप्तिं समालोकितवन्तौ, सहैव क्षेत्रीय-वैश्विक विषयेषु विचार-विनिमयं कृतवन्तौ।

सा प्रख्यापितवती यत् 'भारत-उत्तर-मैसेडोनिया-व्यापारिक मञ्चः' आर्थिक सम्बन्धान् दृढीकर्तुं बहुमूल्यं मञ्चं प्रदास्यति। अनेन सह राष्ट्रपतिः मुर्मु भारतपक्षतः मैसेडोनिया-देशाय 'आईटेक' प्रशिक्षण-स्थानानां संख्यां द्विगुणीकर्तुं उदघोषयत्, यस्मिन् 'कृत्रिमबुद्धिमत्ता सम्बद्धाः पाठ्यक्रमाः अपि समाविष्टाः सन्ति। सांस्कृतिक-सम्बन्धस्य विषये च राष्ट्रपतिः अवोचत् यत् उभावपि देशौ पारम्परिक चिकित्सा-पद्धतिम् सविशेषं केन्द्रीकृत्य स्वास्थ्य-सहयोग-सहमति-पत्रस्य नवीकरणं करिष्यतः। सा 'स्कॉप्ये-सङ्ग्रहालये महात्मगान्धिनः प्रतिमायाः संयुक्त अनावरण-विषये सन्तोषं प्राकटयत्, राष्ट्रपतिः मुर्मु विश्वासं प्राकटयत् यत् तस्याः एषा 'युगान्तरकारिणी यात्रा' द्वयोः राष्ट्रयोः बहुआयामि-सहभागितां पुनरपि सुदृढां करिष्यति, द्विपक्षीय-सम्बन्धान् च नूतन-शिखरं प्रति नेष्यति। ततः प्राक् 'स्कॉप्ये' स्थिते राष्ट्रपति-आवास-प्राङ्गणे 'विल्ला वोड्नो' इत्यत्र राष्ट्रपतिः मुर्मु साभिनन्दनं राजकीय-स्वागतं प्राप्तवती। एषा कस्यापि भारतीय राष्ट्रपतेः उत्तर-मैसेडोनिया-देशाय प्रथमा 'राजकीय-यात्रा' अस्ति, या द्वयोः देशयोः सम्बन्धेषु कञ्चन महत्त्वपूर्ण सोपानं स्थापयति।

# 'रेड अलर्ट' इति तीव्रसतर्कतायाः मध्ये विनाशः, बोह-घाटी-क्षेत्रे मेघविस्फोटात् षट् गृहाणि प्रक्षालितानि



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेशस्य बहुषु भागेषु भृशवृष्टेः 'रेड अलर्ट' (अतितीव्रसतर्कता) इत्यस्य मध्ये विनाशः संजातः। काङ्गड़ा-जनपदस्य शाहपुर-उपमण्डलस्य बोह-घाटीक्षेत्रे मङ्गलवासरे मेघविस्फोटात् षट् गृहाणि प्रक्षालितानि। तथापि, अस्मिन् कस्यापि जनस्य प्राणाः न गताः। काङ्गड़ा-जनपदस्य उपायुक्तः (डीसी) हेमराजबैरवः ज्ञापितवान् यत् घटनास्थले शाहपुरस्य उपमण्डलाधिकारी (एसडीएम) तथा राज्य-आपदा-प्रतिक्रिया-बलस्य (एसडीआरएफ) दलं प्रेषितम् अस्ति। सूचनानुसारं मेघविस्फोटात् सपेड़ी-गरूं-ग्रामयोः षट् गृहाणि प्रवाहीकृतानि। अपरतः लमग्रामाय अपि सङ्कटः उत्पन्नः जातः। मेघविस्फोटेन बहवः मार्ग-मार्गाः अपि प्रभाविताः संजाताः।

### २४ होरासु काङ्गड़ा-सिरमौर-चम्बा-क्षेत्रेषु प्रचुरवृष्टिः

विगतेषु २४ होरासु पालमपुरे १३६.४, ददाहू-क्षेत्रे १०५.६, जटोन-वैराज-सिरमौरे १०३.६, पांवटा-साहिबे ७९.८, नाहननगरे ७९.२, धर्मशालायाम् ७५.४, भटियात-चम्बाक्षेत्रे ७१.०, काङ्गड़ायां ६८.२, पच्छादे ६५.३, संगड़ाहक्षेत्रे ६०.०, धौलाकुआं क्षेत्रे ६०, सुन्दरनगरे ३१.८, मण्ड्यां ३०.४, कुफरीक्षेत्रे २८.० मिलीमीटर परिमिता वृष्टिः अङ्किता।

### कति दिनानि यावत् वर्षिष्यन्ति मेघाः-

ऋतु-विज्ञान-केन्द्र-शिमलायाः अनुसारं २१, २२, २३, २६, २७ जुलाई-दिनाङ्केषु राज्यस्य अधिकांश-स्थानेषु मन्दात् मध्यमा वृष्टिः भवितुं सम्भावना अस्ति। अनेन सहैव २१ जुलाई-दिनाङ्के कतिपयेषु स्थानेषु अतिभृशवृष्टेः, २२ जुलाईदिनाङ्के कतिपयेषु स्थानेषु भृशवृष्टेः, २३, २६, २७ जुलाई- दिनाङ्केषु कतिपयेषु स्थानेषु अतिवृष्टेः सचेतना (अलर्ट) कृता। सप्ताहस्य अवशिष्टेषु दिनेषु राज्यस्य बहुषु स्थानेषु मन्दात् मध्यमा वृष्टिः, कतिपयेषु स्थानेषु च अति-वृष्टिः भवितुं सम्भावना अस्ति।

### मण्डी-जंजैहली-सहिताः १५ सम्पर्कमार्गाः अवरुद्धाः

निरन्तरवृष्टेः कारणात् सराज-क्षेत्रे मार्गव्यवस्था पुनरेकवारं शिथिला जाता। मण्डी- जंजैहली-मुख्यमार्गेण सह १५ सम्पर्कमार्गाः भूस्खलनेन आवागमनाय अवरुद्धाः संजाताः। मण्डी-जंजैहलीमार्गः बहुषु स्थानेषु मलिनावशेषस्य आगमनेन बाधितः अस्ति, यदा तु मण्डी-जंजैहली (धरोटधारमार्गेण) मार्गः कलहनीसमीपे भूस्खलनेन पूर्णतया पिहितः अस्ति। एतदतिरिच्य बगस्याड़-शिकावरी, बगस्याड़-थुनाग (रैणगलू-मार्गेण) मार्गाः अपि बहुषु स्थानेषु अवकरस्य पतनेन प्रभाविताः सन्ति। क्षेत्रस्य बहवः अन्ये सम्पर्कमार्गाः अपि निरुद्धाः सन्ति, येषु केचन ३० जून २०२५ तः अद्यावधि पूर्णतया सुचारतया कर्तुं न शकिताः। वर्षाकाले मार्गेषु अवरुद्धेषु सत्सु आगामिनि सेब-ऋतौ नकद-सस्यानां वहनं प्रति कृषकाणां बागवानानां च चिन्ता वर्धिता। आगामिषु १० तः १५ दिनेषु सेब-ऋतुः आरप्स्यते, यदा तु अधस्तन-सराजे एषु दिनेषु वार्तांकी सस्यं महता प्रमाणेन विपणीः (मंडियों) प्रति नीयते। स्थानीयैः कृषकैः उद्यानपालकैः च मुख्यमन्त्रिणः सुखविन्द्रसिंहसुक्खुनः, लोकनिर्माणमन्त्रिणः विक्रमादित्यसिंहस्य, पूर्वमुख्यमन्त्रिणः जयरामठाकुरस्य च समीपे एषा याचना कृता यत् वर्षाकाले तथा आगामि-वानिकी-ऋतुं विलोक्य अतिरिक्तानि यन्त्राणि श्रमिकाः च नियोज्य पिहितान् मार्गान् युद्धस्तरे सुचारून् क्रियन्ताम्, येन जनानां गमनागमने कृषि-बागवानी-कार्येषु च कस्यापि प्रकारस्य कष्टं न भवेत्। अपरतः, लोकनिर्माणविभाग- सराजमण्डलस्य सहायक-अभियन्त्रा योगेशकुमारेण ज्ञापितं यत् पिधित-मार्गाणां पुनश्चालनाय यन्त्राणि श्रमिकाः च नियोजिताः सन्ति।



# हिमाचलस्य काङ्गड़ाक्षेत्रे

# भविष्यति नद्याः उपरि निर्मास्यमानं देशस्य द्वितीयं विमानपत्तनम्

***पर्वतेषु दृश्यते तान्त्रिककौशलस्य अपूर्वः चमत्कारः, गगलक्षेत्रे माझी-खड्ड-नद्याः उपरि निर्मास्यते ३८० मीटरदीर्घः विशेषः सेतुः***

हिमसंस्कृतवार्ताः:- काङ्गड़ा ।हिमाचलप्रदेशस्य काङ्गड़ा-विमानपत्तनस्य (एयरपोर्ट) विस्तारः अधुना एकस्य ऐतिहासिकस्य अपूर्वस्य च तान्त्रिक-कौशलस्य (इंजीनियरिंग) साक्षी भवितुं गच्छति। शीघ्रमेव अस्मात् विमानपत्तनात् उड्डयनं कुर्वन्ति बृहन्ति विमानानि माझी-खड्ड-नद्याः जलधारायाः साक्षात्-उपरि एव वेगेन चलन्ति दृश्यन्ते। विमानपत्तनस्य 'रनवे' (हवाई पट्टी) दीर्घतां वर्धयितुं माझी-खड्ड-नद्याः उपरि प्रायः ३८० मीटरदीर्घः एकः विशेषः सेतुः निर्मास्यते, यस्य उपरि एव नूतनायाः हवाईपट्टिकायाः निर्माणं भविष्यति। अस्याः महत्त्वाकाङ्क्षिपरियोजनायाः पूर्त्या परं काङ्गड़ा- विमानपत्तनं हिमालय-क्षेत्रस्य प्रथमं देशस्य च द्वितीयं एतादृशं विमानपत्तनं भविष्यति, यत्र नद्याः उपरि निर्मित-संरचनायां 'रनवे' सज्जं भविष्यति। अपरतः, काङ्गड़ामण्डलायुक्तः (उपायुक्त) हेमराज बैरवा महोदयः कथयति यत् प्रदेशसर्वकारः अस्याः परियोजनायाः धरातले अवताराय सर्वान् सम्भाव्यान् प्रयासान् करोति। अस्यामेव शृङ्खलायां भूम्यधिग्रहणेन सह माझी-खड्ड-नद्याः उपरि निर्मास्यमानस्य सेतोः तान्त्रिक-पक्षेषु अपि कार्यम् आरब्धम्। पार्वत्यक्षेत्रे स्वकीये रूपे इयम् एकः अपूर्वः प्रयासः वर्तते। नद्याः उपरि 'रनवे' निर्माणस्य देशे अधुना यावत् केवलम् एकमेव उदाहरणं विद्यते। एतस्मात् पूर्वं 'चेन्नई-अंतरराष्ट्रीय- एयरपोर्ट' इत्यस्य 'रनवे' अडयार-नद्याः उपरि गच्छति। अधुना 'गगल-एयरपोर्ट' अपि आधुनिकीं तकनीकं ग्रहीतुं गच्छति, येन हिमाचलप्रदेशः देशस्य विमानन-इतिहासे एकं नूतनम् अध्यायं योक्ष्यति।

### गुरु-भारं वहिष्यति आप्लावेन अपि योत्स्यते-

पार्वत्यक्षेत्रे एषः सेतुः केवलम् एकः हेतुः न भविष्यति, अपि तु आधुनिक-तान्त्रिक-कौशलस्य एका निदर्शनम् भविष्यति। एषः विशेषः सेतुः एतादृशेन रूपेण संरचिष्यते यत् एषः विमानानां गुरुभारं, लैंडिंगकाले जायमानं कम्पनं, कठोर- सुरक्षा- मानकैः सह भूकम्पीय-गतिविधिभ्यः वर्षाकाले नद्याः तीव्र-प्रवाहात् अपि सरलतया सह रक्षितुं शक्ष्यति।

### पर्यटने भविष्यति वृद्धिः, जीविका अपि लप्स्यते-

वर्तमाने काङ्गड़ा-विमानपत्तने 'रनवे' दीर्घतायाः सीमितत्वात् बृहताम् विमानानां सञ्चालने महती असुविधा वर्तते। रनवे-इत्यस्य अस्य अपूर्व- विस्तारात् परं अधिक-क्षमता-युक्तानां विमानानाम् आवागमनं सरलतया सम्भविष्यति। अस्य साक्षात् महान् च लाभः हिमाचलस्य विश्वप्रसिद्धेभ्यः पर्यटनक्षेत्रेभ्यः प्राप्स्यति। देश-विदेशेभ्यः आगच्छद्भ्यः पर्यटकेभ्यः श्रेष्ठा वायु-सुविधा उपलब्धौ सत्यां पर्यटन-व्यवसाये बृहत्-उच्छालः आगमिष्यति इति आशा वर्तते। अनेन सह एव जीविकायाः नूतनाः अवसराः अपि सृजिताः भविष्यन्ति। पर्यटनविभागस्य उपनिदेशकः विनयधीमानः कथयति यत् नद्याम् निर्मास्यमानः 'रनवे ब्रिज' इति नूतनः प्रयासः अस्ति। एयरपोर्ट- विस्तार- परियोजनायाः पूर्त्या परं हिमाचलप्रदेशस्य एतत् विमानपत्तनं देशस्य आधुनिक-एयरपोर्ट- तन्त्रे स्वकीयाम् एकां पृथक् विशिष्टां च परिचयं विधास्यति। माझी-खड्ड-नद्याः उपरि निर्मास्यमानः एषः 'रनवे ब्रिज' आगामिसमये पार्वत्यक्षेत्रेषु हवाई- सम्पर्कस्य वर्धनाय मीलस्तम्भः सिद्धः भविष्यति।

# हिमाचलस्य 'टैक्सी-सञ्चालकानां' महत्तमा याचना पूर्णा, १५ वर्षियावधिं यावत् चलिष्यन्ति 'ऑल इण्डिया टूरिस्ट परमिट' वाहनानि




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलस्य 'ऑल इण्डिया टैक्सी' सञ्चालकानां सुदीर्घकालात् प्रचलन्ती एका महत्त्वपूर्णा याचना परिपूर्णा संजाता। उपमुख्यमन्त्रिणा मुकेश अग्निहोत्रिणा प्रोक्तं यत् प्रदेशसर्वकारेण 'ऑल इण्डिया टूरिस्ट परमिट' वाहनानां कृते अधिकतम-परिचालनावधिः १२ वर्षेभ्यः वर्धयित्वा १५ वर्षाणि करणस्य प्रावधानस्य प्रवर्तनाय आवश्यकाः उपायाः गृहीताः। अस्मिन् सन्दर्भे परिवहनविभागेन आवश्यकाः आदेशाः प्रसारिताः सन्ति, 'मानक- सञ्चालन- प्रक्रिया' अपि अधिसूचिता कृता, येन पात्रवाहनानि अस्याः संशोधितव्यवस्थायाः लाभं प्राप्तुं शक्ष्यन्ति। तेन कथितं यत् एषः निर्णयः प्रदेशस्य पर्यटन-परिवहन-क्षेत्राभ्यां सम्बद्धानां सहस्रशः टैक्सी-सञ्चालकानां कृते महतीं साहाय्यताम् आनयत्। सुदीर्घकालात् वाहनसञ्चालकाः इमां याचनाम् उत्थापयन्तः आसन्। अधुना संशोधितव्यवस्थायाः प्रवर्तनेन पात्रवाहनानां सञ्चालनम् १५ वर्षियावधिं यावत् विधातुं शक्ष्यते, येन टैक्सी-सञ्चालकेषु आर्थिकभारः न्यूनः भविष्यति तेषां जीविका च सुदृढा भविष्यति।

### केन्द्रस्य समक्षं प्रमुखतया उत्थापितः आसीत् विषयः

उपमुख्यमन्त्रिणा प्रतिपादितं यत् हिमाचलप्रदेशस्य 'ऑल इण्डिया टैक्सी' सञ्चालकानाम् इमां याचनां तेन केंद्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्रिणः नितिनगडकरी महोदयस्य समक्षं प्रमुखतया उपस्थापिता आसीत्। तेन केन्द्रसर्वकारः ज्ञापितः आसीत् यत् हिमाचलसदृशे पर्यटनप्रधाने राज्ये सहस्रशः परिवाराः 'ऑल इण्डिया टूरिस्ट परमिट' वाहनानां माध्यमेन स्वकीयां जीविकां चालयन्तः सन्ति। एतादृश्याम् अवस्थायां वाहनानां सञ्चालनावधिवर्धनं समयस्य आवश्यकता आसीत्। तेन प्रोक्तं यत् केन्द्रसर्वकारेण नियमेषु संशोधने कृते सति प्रदेशसर्वकारेण अपि तत्परतां प्रदर्श्य अस्य प्रभावी-कार्यान्वयनार्थं सर्वे आवश्यकाः आदेशाः प्रसारिताः।

### नियमानुसारं प्राप्स्यते लाभः-

मुकेश अग्निहोत्रिणा कथितं यत् संशोधित-व्यवस्थायाः अन्तर्गतं एतादृशानि पात्र-एआईटीपी वाहनानि, येषां पञ्जीकरणतिथिः १५ वर्षेभ्यः न्यूना अस्ति, निर्धारितानां नियमानां पूरणात् परम् अस्याः सुविधायाः लाभं ग्रहीतुं शक्ष्यन्ति। अस्य कृते वाहनस्वामिभिः वैधं योग्यताप्रमाणपत्रं, पञ्जीकरणप्रमाणपत्रं, बीमा, प्रदूषण- नियन्त्रण- प्रमाणपत्रं, सर्वेषां कराणां सर्वकारीयदेयतानां च भुक्तिः अन्याः च वैधानिकाः औपचारिकताः पूरणीयाः भविष्यन्ति। इमां सम्पूर्णां प्रक्रियां पारदर्शिनीम् एकरूपां च विधातुं परिवहनविभागेन विस्तृता 'एसओपी' अपि प्रसारिता अस्ति।

### पर्यटन-परिवहन-क्षेत्राभ्यां प्राप्स्यते बलम्-

उपमुख्यमन्त्रिणा प्रोक्तं यत् अनेन निर्णयेन न केवलं टैक्सी-सञ्चालकेभ्यः आर्थिक-साहाय्यं प्राप्स्यति, अपितु प्रदेशस्य पर्यटन-उद्योगाय अपि नूतना गतिः लप्स्यते। पर्यटन-ऋतौ श्रेष्ठाः परिवहनसुविधाः उपलप्स्यन्ते सहस्रशः परिवाराणां जीविका च सुरक्षिता भविष्यति। तेन कथितं यत् प्रदेशसर्वकारः परिवहनक्षेत्रेण सम्बद्धानां जनानां हितानां रक्षणाय कटिबद्धः अस्ति भविष्ये अपि तेषां व्यावहारिक-समस्यानां निस्तारणाय सकारात्मकाः निर्णयाः स्वीकरिष्यन्ते।

# पूर्व-विधायकं सतर्कता-विभागः आह्वयिष्यति, होशियारसिंहः अवदत्- एषः पारिवारिक- कलहः



**हिमसंस्कृतवार्ताः- काङ्गड़ा।** विधायक-ऐच्छिक-निधेः कथित-दुरुपयोग- प्रकरणे सतर्कता-विभागेन अधुना यावत् सप्त- लाभार्थीनां कथनानि पञ्जीकृतानि। अवशिष्टानां लाभार्थीनां कथनानि प्रलेखीयप्रक्रिया च पूर्णा भवेत् तस्मात् परं देहराक्षेत्रस्य पूर्वविधायकः होशियारसिंहः पृच्छा-परीक्षणाय आह्वयिष्यते। अपरतः होशियारसिंहः एकं चलच्चित्रं प्रसार्य प्रतिपादितवान् यत् सः अन्वेषणात् न बिभेति तस्य च विरुद्धं परिवारस्य अन्तः प्रचलन्तं व्यावसायिक- विवादं राजनैतिकरङ्गं प्रदाय कुचक्रं रच्यते। सतर्कता- आरक्षिस्थाने (विजिलेंस थाना) धर्मशालायां पञ्जीकृतायाः प्रथम-सूचना-आख्यायाः अन्तर्गतं १६ लाभार्थीषु सप्त-जनानां कथनानि अभिलिखितानि सन्ति। सर्वे अपि लाभान्विताः देहरा-विधानसभा-क्षेत्रेण सह सम्बद्धाः सन्ति पूर्वविधायकस्य कम्पन्यां च कार्यरताः कथ्यन्ते। अन्वेषणसंस्था अवशिष्टानां कथनानि स्वीकर्तुं सम्बद्धप्रलेखानां च सङ्ग्रहणे संलग्ना अस्ति। एतस्मात् परं पूर्वविधायकः प्रष्टुं समाह्वयिष्यते। सतर्कताविभागस्य अन्वेषणे अधुना यावत् एतादृशाः तथ्याः सम्मुखम् आगताः यत् २०२३-२४ वर्षे लाभार्थीनां वित्तकोष-संख्यासु विधायक- ऐच्छिक- निधितः साहाय्यराशिः सञ्चिता अभवत्। आरोपः अस्ति यत् राशिं निष्कास्य पूर्वविधायकस्य कथनानुसारं सा एव राशिः तस्मै पुनः प्रत्यर्पिता। यद्यपि, प्रकरणास्य अन्वेषणं कुर्वन्तः अधिकारिणः अस्य सन्दर्भे कापि आधिकारिकीं टिप्पणीं विधातुं वर्जयन्तः सन्ति। अस्य प्रकरणस्य आरम्भः पति- पत्नी इति कर्मचारी-द्वयस्य द्वाभ्यां उपालम्भाभ्याम् अभवत्। अन्वेषणे अग्रे सरति अन्येषाम् १४ लाभार्थीनां नामानि अपि सम्मुखम् आगतानि। आरोपः अस्ति यत् २०२३ तमे वर्षे कर्मचारिणां वित्तकोष-संख्यासु षट्-लक्ष रूप्यकाणि तथा च २०२४ तमे वर्षे सप्त-लक्ष रूप्यकाणि साहाय्यराशिः सञ्चिता कारिता, या पश्चात् पुनः गृहीता।

### होशियारसिंहः चलच्चित्रं प्रसारितवान्

पूर्वविधायकेन होशियारसिंहेन मङ्गलवासरे चलच्चित्रं (वीडियो) प्रसार्य सर्वे अपि आरोपाः निराधाराः कुचक्रं च इति प्रोक्ताः। तेन कथितं यत् परिवारस्य अन्तः प्रचलन्तं व्यावसायिक-विवादं राजनैतिकरङ्गं दीयते। तस्यानुसारं भ्रात्रा भ्रातृजेन च कर्मचारिणः भाययित्वा सतर्कता-विभागे उपालम्भं कारयितुं प्रेरिताः। तेन प्रश्नः उत्थापितः यत् यदि आरोपाः सत्याः आसन् तर्हि त्रिवर्षेभ्यः परम् एव उपालम्भः किमर्थं सम्मुखम् आगता। होशियार सिंहेन पक्षः कृतः यत् विधायक-पदे तिष्ठता तेन स्वकीयात् ऐच्छिक-निधेः सहस्रशः जनेभ्यः साहाय्यं प्रापितम् आसीत्। तेन आरोपः कृतः यत् तस्य एकेन भ्रात्रा व्यवसाये १५ कोटिरूप्यकाणां गबनं कृतम्, यस्य प्रकरणं न्यायालये विचाराधीनम् अस्ति। तस्यैव विवादस्य कारणात् तस्य विरुद्धं कुचक्रं रचितम्। तेन प्रोक्तं यत् सः विदेशात् प्रत्यागमनात् परं सर्वैः १६ लाभार्थीभिः सह स्वयं एस.पी. कार्यालये उपविश्य सम्भाषणं कर्तुं सज्जः अस्ति। साकमेव मुख्यमन्त्रिणि कृतानां पुरातन- आरोपाणां सन्दर्भं ददता तेन प्रश्नः कृतः यत् तेषु प्रकरणेषु विजिलेंस-विभागेन अन्वेषणं किमर्थं न विहितम्। पूर्वविधायकः होशियारसिंहः विदेशे अस्ति। तेन चलच्चित्रं प्रसार्य प्रोक्तं यत् ऐच्छिक-निधेः इयं राशिः केवलं १६ जनेभ्यः न, अपितु सहस्रशः जनेभ्यः प्रदत्ता अस्ति। तेन ऐच्छिक- निधेः धनप्रत्यावर्तनस्य आरोपः निराधारः कथितः। अहम् एस.पी. विजिलेंस कार्यालयं गमिष्यामि, मया सत्यस्य पक्षः गृहीतः इति।

# भारतस्य एच.एस. प्रणयः मलेशिया-देशस्य लियोङ्ग जुन् हाओ इत्यमुना 10-21, 14-21 इत्यङ्कैः पराजितः



चीन-ओपन-बैडमिण्टन्-प्रतिस्पर्धायां अद्य महिला एकल-वर्गस्य राउंड-ऑफ-32-चक्रे भारतस्य अग्रगण्या क्रीडिका पी.वी. सिन्धुः स्वस्य देशस्यैव उन्नति-हुड्डां सम्मुखीकरिष्यति।अपरतः गतदिने चाङ्गझू-नगरे पुरुष एकल-वर्गे भारतस्य एच.एस. प्रणयः मलेशिया-देशस्य लियोङ्ग जुन् हाओ इत्यमुना 10-21, 14-21 इत्यङ्कैः पराजितः । अस्मिन्नेव वर्गे लक्ष्य-सेनः, आयुष-शेट्टी च अन्यौ भारतीय-क्रीडकौ स्तः । महिला-एकल-वर्गे देविका-सिहाग इत्येषा थाईलैण्ड-देशस्य बुसानन-ओङ्गबामरुङ्गफान इत्यनया क्रीडिकया 19-21, 21-19, 13-21 इत्यङ्कैः पराजिता। एतदतिरिच्य, श्वः प्रातः मिश्रित-युगलवर्गे ओलम्पियन् तनीषा-क्रास्टो, ध्रुव-कपिला सहैव रोहण-कपूरः, ऋत्विका-शिवानी-गड्डे इत्येते भारतस्य प्रतिनिधित्वं करिष्यन्ति।

# बालभारती पब्लिकविद्यालये भारत-स्काउट्स-गाइड्स तथा कनिष्ठ-रक्त-क्रॉस-इकायोः भव्योद्घाटनम्



बालभारती सार्वजनिकविद्यालये, एनटीपीसी दार्लिपाल्यां, दिनाङ्के २० जुलै २०२६ तमे दिने भारत-स्काउट्स-गाइड्स तथा कनिष्ठ-रक्त-क्रॉस (Junior Red Cross – JRC) इत्यनयोः इकायोः उद्घाटनसमारोहः गौरवपूर्णेन उत्साहपूर्णेन च वातावरणेन सम्पन्नः। अयं कार्यक्रमः विद्यालयस्य प्रधानाचार्याया श्रीमत्याः उन्नति जोशी महोदयायाः नेतृत्वे, चाइल्ड एजुकेशन सोसायटी संस्थायाः अध्यक्षा श्रीमती मीनू गोस्वामी महोदया तथा सचिव-प्रबन्धिका श्रीमती नानू रेखी महोदया इत्येतयोः मार्गदर्शनेन, एनटीपीसी दार्लिपालेः सहयोगेन च सफलतया आयोजितः।

कार्यक्रमे डाॅ. विभीषण बारिक (जिलायुक्तः, भारत-स्काउट्स-गाइड्स, सुन्दरगढ़), श्री अनिलकुमार पाणिग्रही (जिलायुक्तः, कनिष्ठ-रक्त-क्रॉस, सुन्दरगढ़), श्रीमती खिलेन्द्री पटेल (डी.टी.सी., गाइड), श्री श्रीकान्त साह (जिलाप्रतिनिधिः, स्काउट) तथा श्रीमती विजयलक्ष्मी नाइक (जे.आर.सी. समन्वयिका) इत्येते विशिष्टातिथयः उपस्थिताः। विद्यालयपरिवारेण तेषां पुष्पगुच्छैः स्मृतिचिह्नैश्च सादरं स्वागतं कृतम्। दीपप्रज्वलनेन सरस्वती-वन्दनया च कार्यक्रमस्य शुभारम्भः अभवत्। ततः परं अतिथिभिः भारत-स्काउट्स-गाइड्स तथा कनिष्ठ-रक्त-क्रॉस-इकायोः विधिवद् उद्घाटनं कृतम्। स्वीयसम्बोधने डाॅ. विभीषण बारिक महोदयः स्काउट्स-गाइड्सस्य सेवाभावं, अनुशासनम्, नेतृत्वगुणं, स्वावलम्बनं राष्ट्रभक्तिं च विशेषतया प्रतिपादितवान्। श्री अनिलकुमार पाणिग्रही महोदयः कनिष्ठ-रक्त-क्रॉसस्य माध्यमेन विद्यार्थिषु मानवसेवा, स्वास्थ्यजागरूकता, प्राथमिक-चिकित्साज्ञानं तथा सामाजिक-उत्तरदायित्वभावनायाः विकासस्य महत्त्वम् अवदत्। अवसरे चयनितविद्यार्थिभ्यः स्काउट्स-गाइड्स तथा कनिष्ठ-रक्त-क्रॉस-इकायोः स्कार्फाः परिधाप्य सदस्यत्वं प्रदत्तम्। प्रधानाचार्या श्रीमती उन्नति जोशी महोदया स्वीयसम्बोधने उक्तवती यत् एतादृशाः सहशैक्षिककार्यक्रमाः विद्यार्थिनां सर्वाङ्गीणव्यक्तित्वविकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति। तैः नेतृत्वक्षमता, सेवाभावः, अनुशासनम्, आत्मविश्वासः, नैतिकमूल्यानि च विकसितानि भवन्ति। अयं कार्यक्रमः संयुक्तराष्ट्रसङ्घस्य सतत-विकास-लक्ष्यैः (SDGs) अपि सम्बद्धः आसीत्। विशेषतः SDG–3 (उत्तमस्वास्थ्यं कल्याणं च), SDG–4 (गुणवत्तापूर्णा शिक्षा), SDG–13 (जलवायुपरिवर्तनस्य प्रति कार्यम्) तथा SDG–16 (शान्तिः, न्यायः, सुदृढाः संस्थाः) इत्येषां लक्ष्याणां पूर्तये विद्यार्थिषु सेवाभावः, नेतृत्वक्षमता, स्वास्थ्यजागरूकता, पर्यावरणसंरक्षणं तथा सामाजिक-उत्तरदायित्वस्य भावना प्रबला कृता।

सम्पूर्णः समारोहः प्रेरणादायकवातावरणे सम्पन्नः। विद्यालये भारत-स्काउट्स-गाइड्स तथा कनिष्ठ-रक्त-क्रॉस-इकायोः स्थापना विद्यार्थिनां सेवा, अनुशासनम्, नेतृत्वम्, मानवता तथा राष्ट्रसेवायाः भावनां दृढीकर्तुं महत्त्वपूर्णा प्रेरणादायिनी च सिद्धा।




## नहीं भूलदे सै पुराणे वाले दिन

प्याहगा उठना बौड़ीया पर नौहणा
कहड़ा पहरी कने कहरा जो ल्यौणा
मालतिया रे फुल कहड़े च पाणे
कने राम राम बोलदे कहरा जो वापिस औणा
पाणिए री बौहत तंगी सै पाणी बचाने वाले दिन
नहीं पुहलदे सै पुराणे वाले दिन

टाटाह पर बैठी कने स्कूला करनी पढ़ाई
नलाह री कलम कने दवाता च काली स्याई
पटिया पर लिखदे हथ मुंह काले
पट्टी तोहई फेरी तुहपे सुखाई
पटे रा पजामा जांघिया पाणे वाले सै दिन
नहीं पुहलदे सै पुराणे वाले दिन




**तिन किलोमीटर दूर स्कूला पैदल ई जाणा**
**इक्की हथा ने निकर थहमणी कच्छा**
**बस्ता लटकाणा**
**होलिया जो रंगां रिया जगह तवे री स्याही**
रंग लाणे रा डराव देई ने बाट
बताउआँ ते पैसे गुराहणा
पूरे गांवां ते लकडू कठा करी ने
गिठा जलाणे वाले दिन
नहीं पुहलदे सै पुराणे वाले दिन

छेखिरा चहगु कने छेख़िरी पैंट
बीह बीह टहलियाँ पाईरी
चोरी करनी छलियाँ कने काकड़ियाँ
खेतां च नवीं नवीं बाटां लाईरी
**लोकां ते चहफोने कने मार खाणे वाले दिन**
नहीं पुहलदे सै पुराणे वाले दिन

कांचेयाँ रा सै खेल सै गुली डंडा
किसी ते पौंदे छितर किसी ते चंडा
**मनदे नी थे कहढ़दे थे नवें नवें छिंगढ़**
किसी जो ग्लान्दे थे काचरू
किसी जो ग्लान्दे थे ब्लेंगड़
**ज़िद करी रोई अपणी मांग मनवाणे वाले दिन**
नहीं पुहलदे सै पुराणे वाले दिन

**म्यान करदी हाण चिकडे च मरेहलणा**
**खेतां बाहन्दी हाण मैंड़े चुहटणा**
**बरखा लगदी तां प्रौलिया ऐहठ नौहणा**
**नक चढ़ाना खाना नियाँ कोई सलूणा**
**टांडुआं रा लम्बा केहरसू बनाने वाले दिन**
**नहीं पुहलदे सै पुराणे वाले दिन**

**मेले जो जाणा सौगी पाहई कने पैहणा**
**तेहला नी जेबा दुकाना अगे खड़ी**
**ल्याखि रहणा**
**बड़े मुश्किलें लैणा इक फूका वाला**
**बाजा**
**सारे रस्ते पों पों करी ने सैई बजाणा**
**बाजे कने ई दिल बलाहणे वाले दिन**
**नहीं पुहलदे सै पुराणे वाले दिन**




**रवींद्र कुमार शर्मा**
**नज़दीक डी ए वी स्कूला**
**गांव व डाकघर घुमारवीं**
**जिला बिलासपुर हि प्र174021**

# लौकिकन्यायकोशः

## कौन्तेयराधेयन्यायः

कर्णः कुन्त्याः पुत्रः आसीत् परन्तु सः तत् न जानाति स्म। अतः स्वस्य पालयित्र्याः राधायाः पुत्रः अस्मीति सः मन्यते स्म। परन्तु यदा सः सत्यं ज्ञातवान् तदा सः कौन्तेयः अभवत्। तथैव शरीरमेव आत्मा इति आरम्भे भावना भवति अग्रे गुरुपदेशेन शरीरात् आत्मा भिन्न इति पृथक्त्वज्ञानं भवति इति सूचयितुम् अस्य न्यायस्य प्रयोगः क्रियते।

समानौ- कर्णकौन्तेयन्यायः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीररजः**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। श्वेतभवने एकः भाषण- यन्त्र- सञ्चालकः कार्यविरामे स्थापितः। यतः राष्ट्राध्यक्षेण यानि पदानि उक्तानि, तेषु तेन पणः कृतः। एवं तेन गुप्तरूपेण प्रभूतं धनम्
अर्जितम्।

**काव्या-** नमस्ते नन्दिनि। अहो, तत् अतीव विचित्रम्! राष्ट्राध्यक्षस्य भाषणे अपि
द्यूतं कृतम्। त्वं सम्यग् अवोचः। भारते अपि एका कूटवार्ता आरक्षकैः ज्ञाता। तत्र सप्तदश जनाः आरक्षकैः बद्धाः। तैः वञ्चकैः सामान्य-मरणानि अपि सर्पदंशेन जातानि इति मिथ्या-प्रमाणपत्राणि रचितानि। एवं सर्वकारात् तैः लक्षशः रूप्यकाणि
प्राप्तानि।

**नन्दिनी-** धिक् तान् वञ्चकान्! सर्पदंशस्य नाम्ना धनम् अपहृतम्। अन्तरिक्षे अपि एका आश्चर्यकरी घटना वैज्ञानिकैः दृष्टा। म्रियमाणाः ताराः शान्तिपूर्वकम् न नष्टाः। ताभिः ताराभिः वायोः पिण्डाः बहिः क्षिप्ताः। तेन प्रहारेण ताः ताराः अन्तरिक्षे इतस्ततः क्षिप्ताः।

**काव्या-** आश्चर्यम्! ताराभिः अपि पवन-प्रहारः कृतः! इदानीं तैलपानाम् एका नूतना वार्ता मया पठिता। वैज्ञानिकैः तैलपेभ्यः जलतरण-वस्त्राणि निर्मितानि। पूर्वं यन्त्र-नियन्त्रिताः तैलपाः जले निमग्नाः। अतः नूतन-वस्त्रैः प्राणवायुः तैः प्राप्तः। ते तैलपाः जलस्य अन्तः सुखेन चलिताः।

## शिक्षकः छात्रः च



**शिक्षकः-** रमेश! वद, यदि तव पार्श्वे पञ्च आम्राणि सन्ति, मम पार्श्वे च पञ्च आम्राणि सन्ति, तर्हि कुलेन कियन्ति आम्राणि अभवन्?
**रमेशः-** महोदय! मम पार्श्वे तु किमपि नास्ति!
**शिक्षकः-** (क्रोधेन) कथम्? मया तु उक्तं यत् तव पार्श्वे पञ्च आम्राणि सन्ति!
**रमेशः-** अहम् सर्वं खादितवान् श्रीमन्!